|| श्रौतकर्मणि  वैज्ञानिकी दृष्टिः ||

|| दार्शिकीवेद्याः चन्द्रमण्डलेन  सह साम्यत्वम् ||

डा॥ रं. नारायण अयङ्गार्
विशिष्टप्राध्यापकः
पुरातन-इतिहास-संस्कृति-शोधकेन्द्रम्
जैनविश्वविद्यालयः, बॆङ्गळूरु
(RN.Iyengar@jainuniversity.ac.in)

1

सभाध्यक्षान् सभासदान् आहिताग्नीन्  पण्डितान्  नमस्कृत्य दर्शपूर्णमासेष्टिम् अधिकृत्य यत्किञ्चित् वक्तुमिच्छामि || नाहं श्रौतकर्मसु निष्णातः नाहं पूर्वमीमांसाशास्त्रे पण्डितः तथापि कृपया आहूतः अयंजनः इति विचिन्त्य मां कृतार्थं मन्ये || धन्यवादाः

इदमपि वक्तव्यं  भाषणे त्रुटयः स्युः , व्याकरणदोषाः कन्नड, आङ्ग्ल भाषाप्रयोगाः भवेयुः  |
एतान् सर्वान् मणिप्रवाळमितिमत्वा अर्थमात्रं गृह्णीयादिति प्रार्थये||

अद्य मम विषयः श्रौतकर्मणि  वैज्ञानिकी दृष्टिः  तत्रापि  दार्शिकीवेदी-चन्द्रमण्डलयोः दृश्यमान साम्यत्वं  प्रति ||

वैदिकग्रन्थेषु लभ्यमानविषयान् परंपरागत पद्धत्या एव समाहृत्य तुलनात्मक अध्ययनेन  कतिपय

वैज्ञानिकविषयान् इदम्प्रथमतया उद्धर्तुं शक्यते  इति यथाशक्ति विशदीकर्तुं  यतिष्ये ||

2

ऋग्वेद मन्त्राणां त्रिधा विवरणम् उचितमिति वेदभाष्येषु , वेदाङ्ग ग्रन्थेषु पठ्यते | अधियज्ञं अध्यात्मं

अधिदैवतं चेति | प्रायः त्रयोऽप्यर्थाः सर्वत्र ओतप्रोताः मिश्रितरूपेणैव भवन्ति इति मम भावना ||

अत्र मम जिज्ञासातु अधिदैवतपक्षदृष्ट्या एव | इदंतु बहुशः यास्काचार्याणां नैरुक्तानां

मतमिति वक्तुं शक्यते ||

उदाहरणार्थं श्रौतकर्मसु सोमग्रहणम् प्रसिद्धम् ||

सोमपानमिति चेत् सामान्यजनाः, विश्वविद्यालयेषु उपाधीन् प्राप्तवन्तोपि मदिरापानं

शिलीन्ध्रसेवनं इति अन्यदपि अश्लीलान् अर्थान् कल्पयन्ति ||

किन्तु तथ्यं गूढं पारिभाषिकं अन्यदेव ||

इन्द्रस्य सोमपानवैभवं पश्यामः ||

3

SOMAPANA LEGEND: INDRA DRINKS 30 LAKES OF SOMA

एकया प्रतिधा पिबत्साकं सरांसि त्रिंशतम् ।
इन्द्रः सोमस्य काणुका ॥

RV. 8.77.4

In a single draught Indra drank 30 lakes full of Soma. Indra is lover of Soma.

एकेन प्रतिधानेनापिबत् । साकं सहेत्यर्थः । इन्द्रः सोमस्य काणुका । कान्तकानीति वा । क्रान्तकानीति वा । कृतकानीति वा । इन्द्रः सोमस्य कान्त इति वा । कणेघात इति वा । कणेहतः । कान्तिहतः ।

तत्रैतद् याज्ञिका वेदयन्ते । त्रिंशदुक्थपात्राणि माध्यन्दिने सवन एकदेवतानि । तान्येतस्मिन् काल एकेन प्रतिधानेन पिबन्ति । तान्यत्र सरांस्युच्यन्ते । त्रिंशदपरपक्षस्याहोरात्राः । त्रिंशत्पूर्वपक्षस्येति नैरुक्ताः । तद् या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्ति । तथापि निगमो भवति ।

Nighaṇtu & Nirukta by Lakshman Sarup

यमक्षितिमक्षितयः पिबन्ति । इति ।

The imperishable one whom the imperishable drink

तं पूर्वपक्ष आप्याययन्ति । तथापि निगमो भवति ।

यथा देवा अंशुमाप्याययन्ति । इति ।

As the gods cause the moon to grow.

अयम् ᵛइन्द्रः ᵛएकया एकेन ᵛप्रतिधा प्रतिधानेन ᵛसाकम्[1] एकधैव ᵛत्रिंशतम् अपि । उक्थपात्राणीत्यर्थः । कीदृशानि । ᵛसरांसि ᵛसोमस्य पूर्णानि सोमरसेन पूर्णानि ᵛकाणुका कान्तानि क्रान्तानि वा सोमेन कृतानि वा सोमपूर्णानि ᵛअपिबत् पीतवान् माध्यंदिनसवने । याज्ञिकप्रसिद्ध्यैवम् । नैरुक्तप्रसिद्ध्या तु कालाभिमानीन्द्रः । त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत् पूर्वपक्षस्य च सन्ति । तानेकरूपमनुभवतीति । एतत्सर्वम् ' एकेन प्रतिधानेनापिबत् ' ( निरु. ५. ११ ) इत्यादिनिरुक्ते तद्व्याख्याने च स्पष्टमुक्तम् । तदत्र द्रष्टव्यम् ॥

4

अधिदैवतपक्षे (कृष्णपक्षगत ) 15 अहानि + 15 रात्रयः = 30 (त्रिंशत् सरांसि) कालपरिमाणम् इति समीचीनम् ||

कुतश्चेत् सूर्याचन्द्रमसोः गमनं वा पर्यटनं निरन्तरं अपरिच्छिन्नं अविभक्तं भवति | अपरपक्षे एव चन्द्रस्य

अर्थात् तद्बिम्बस्य ह्रासः दृश्यते, देवैः सूर्येण इन्द्रेण वा पीयमानत्वात् ||

ह्रासः दिवसेपि जायते परन्तु न इन्द्रियगोचरः रात्रौ तु सर्वेषां प्रत्यक्षं भवति||

एतादृशप्राकृतिकप्रसङ्गे, पृथिव्यां अन्तरिक्षे दिवि वा इन्द्रियगोचर स्थिरचरवस्तुनि यत्र यत्र संख्यानिहिततत्वं

ऋषिभिः दृष्टं, तत्र तत्र नैके वैज्ञानिकविषयाः परोक्षप्रिय-आख्यानरूपेण अपिहिताः स्युः इति अनुमानं

सहजमिति मन्ये ||

5

## Surya Vivaha Sukta

N&N by Lakshman Sarup

सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥

RV 10.85.3

सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिमिति वृथासुतमसोममाह । सोमं यं ब्रह्माणो विदुरिति । न तस्याश्नाति कश्चनायज्वेत्यधियज्ञम् ।

अथाधिदैवतम् । सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिमिति यजुःसुतमसोममाह । सोमं यं ब्रह्माणो विदुश्चन्द्रमसम् । न तस्याश्नाति कश्चनादेव इति ।

अथैषापरा भवति । चन्द्रमसो वा । एतस्य वा ॥ ४ ॥

यत्त्वा देव प्र पिबन्ति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥

RV 10.85.5

यत् त्वा देव प्रपिबन्ति तत आप्यायसे पुनरिति नाराशंसानभिप्रेत्य । पूर्वपक्षापरपक्षाविति वा । वायुः सोमस्य रक्षिता । वायुमस्य रक्षितारमाह । साहचर्यात् । रसहरणाद्वा । समानां संवत्सराणां मास आकृतिः सोमः । रूपविशेषैरोषधिः । चन्द्रमा वा ।

Because they grind the herbs together, one thinks that he has drunk the soma. Of the soma which the Brāhmaṇas know, none whatsoever partakes.[2]

The hemistich, 'Because they grind the herbs together, one thinks that he has drunk the soma', refers to the uselessly-pressed soma, which is not soma at all. Of the soma which the Brāhmaṇas know, none whatsoever, i. e. no one who does not offer sacrifice, can partake. This is with reference to sacrifice.

Now with reference to the deity. The hemistich, 'Because they grind the herbs together, one thinks that he has drunk the soma', refers to the soma pressed with the Yajus formula, which is not soma at all. Of the soma which the Brāhmaṇas know, i. e. the moon, none whatsoever, i. e. no one who is not a god, can partake.

The following, another stanza, is addressed to him, or to the moon.

*(Here ends the fourth section.)*

O god, when they drink thee, forth thenceforward thou thrivest again. Wind is the protector of soma; the month is the maker of years.

O god, when they begin to drink thee, forth thenceforward thou again thrivest; this refers to some particular libations, or to the first and second fortnights of the lunar month. Wind is the protector of soma. The seer calls wind its protector on account of companionship or extracting the juice.[4] The month is the maker of years, of annual periods, i. e. the plant soma on account of its (assuming) particular shapes, or the moon.

Ayajva ←→ Adeva.
Soma is moon in the *adhidaivata* sense.
*Somapāna* is the decrease in the digits of moon's orb in the dark fortnight.

6

सोमशब्दस्य चन्द्र इति लौकिकभाषास्वपि रूढ्यर्थः स्वीक्रियते | तथापि बहुत्र सोमं तन्नामप्रसिद्धलतया निष्पीडित रस इति याज्ञिकपरिभाषया व्याख्यानं प्रचलितमस्ति ||

दिविचरन्तं कथं वैदिकवाङ्मये पश्यामः इति भारतीय ज्योतिःशास्त्रस्य मूलपरिभाषायामेव मेकुतूहलमभवत् ||

दर्शपूर्णमासस्तु साक्षात् दृश्यचन्द्रंप्रति इति आसक्तो अभवम् || तथाकथित त्रिस्कन्धज्योतिषं ईषदपि न लब्धं किंतु केचिदनिरीक्षिताः वैज्ञानिकसूक्ष्मांशाः उदभवन् ||

अत्र संक्षेपेण कतिपय नक्षत्रविद्यासंबद्धविषयाः प्रस्तूयन्ते ||

दर्शेष्टिरपि यज्ञ एव | ऋग्वेदेनापि विधीयते इति पठ्यते||

यजुर्वेदैस्त्रिभिरपि । उक्तं चाऽऽपस्तम्बेन—"यज्ञं व्याख्यास्यामः । स त्रिभिर्वेदैर्विधीयते ऋग्वेदयजुर्वेदसामवेदैः । ऋग्वेदयजुर्वेदाभ्यां दर्शपूर्णमासौ । यजुर्वेदेनाऽग्निहोत्रम् । सर्वैरग्निष्टोमः" ( आप० प० १. १–७ ) इति

यजुर्वेदे तु प्रथम प्रपाठके 14 अनुवाकेषु दर्शपूर्णमासौ प्रसिद्धौ; तै.ब्रा; तै.आ - पि प्रपञ्चितम् ||
ऋग्वेदे कुत्र लभ्यते इति प्रश्नः ||

7




ದರ್ಶಪೂರ್ಣಮಾಸಯೋಃ ಪುರಾರಾಧ್ಯೀತ್ಯೇಷಾ ಜಪ್ಯಾ । ಸೂತ್ರಮುದಾಹೃತಂ ॥

यमैच्छाम मनसा सोऽ३यमागाद्यज्ञस्य विद्वान् परुषश्चिकित्वान् ।
स नो यक्षद्देवताता यजीयान्नि हि षत्सदन्तरः पूर्वो अस्मत् ॥ 1 ॥
अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत् ।
यजामहै यज्ञियान् हन्त देवाँ ईळामहा ईड्याँ आज्येन ॥ 2 ॥
साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम् ।
स आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥ 3 ॥
तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।
ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम् ॥ 4 ॥

ದರ್ಶಪೂರ್ಣಮಾಸಯೋಃ ಸಾಮಿಧೇನ್ಯರ್ಥಂ ಪ್ರೇಷಿತೇನ ಹೋತ್ರಾ ತದದ್ಯ ವಾಚ ಇತ್ಯೇಷಾ ಜಪ್ಯಾ । ಸ್ರುಗಾದಾಪನಾತ್ಪೂರ್ವಮಪಿ ಜಪ್ಯಾ । ಸೂತ್ರಿತಂ ಚ । ತದದ್ಯ ವಾಚಃ ಪ್ರಥಮಂ ಮಸೀಯೇತಿ ಸಮಾಪ್ಯ । ಆ. ೧-೨ । ಇತಿ ॥

ऋ.वे 10.53.2;4
मन्त्रौ दपू यागे उपयुज्येते

This is regarding Saucikāgni & Viśvedevāh. This has to be understood along with the previous suktas 10.52 & 10.51. 10.54 and 10.55 are also interlinked in their contents.

(6) **52** (म.10, अनु.4)

| ऋषिः सौचीकः अग्निः | छन्दः त्रिष्टुप् | देवता विश्वे देवाः |
|---|---|---|

विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य ।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥ 1 ॥
अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनन्ति ।
अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वाम् ॥ 2 ॥
अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः ।
अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम् ॥ 3 ॥
मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरन्तम् ।
अग्निर्विद्वान्यज्ञं नः कल्पयाति पञ्चयामं त्रिवृतं सप्ततन्तुम् ॥ 4 ॥
आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः कराणि ।
आ बाह्वोर्वज्रमिन्द्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥ 5 ॥
त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ 6 ॥

47, 7. 8. 9.] कपिष्ठलकठसंहिता [३५३

समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमवमेहन्ति पेरवः ॥
देवा देवेषु श्रयन्ताम् । प्रथमा द्वितीयेषु श्रयन्ताम् । द्वितीयास्तृतीयेषु श्रयन्ताम् । ये स्थ त्रय एकादशास्त्रयश्च त्रिंशच्च त्रयश्च त्री च [1]शतास्त्रयश्च त्री च सहस्रास्त[2] इमं यज्ञमवन्तु ते मामवन्तु । अनु व आरभे ऽनु मारभध्वम् ॥ ७ ॥

कठसंहिता 35.39

देवा देवेषु श्रयन्तां प्रथमा द्वितीयेषु श्रयन्तां द्वितीयास्तृतीयेषु श्रयन्तां ये स्थ त्रय एकादशास्त्रयश्च त्रिंशच्च त्रयश्च त्री च शता च त्रयश्च त्री च सहस्रा त इमं यज्ञमवन्तु ते मामवन्त्वनु

RV 10.51.9

बृहद्देवता 7-अध्याये

तवाग्ने यज्ञ इत्येतत् प्रत्यार्धि स्विष्टकृच्च सः ।
यस्य त्रीणि सहस्राणि नव त्रीणि शतानि च ॥७५॥
त्रिंशच्चैव तु देवानां सर्वानेव वरान्ददुः ।
ततोऽग्निः सुमनाः प्रीतो विश्वैर्देवैः पुरस्कृतः ॥७६॥

[24] कः समित् समिद्धः चन्द्रमाः। चन्द्रमा ब्रह्मा भवतु।...स च समित् समिद्धः चन्द्रमाः वां युवयोर्होमार्थं...आहुतिर्भवत्वित्यर्थः॥ सोमात्मको हि चन्द्रमा हूयते॥ (*Sāyaṇa Bhāṣya, MPRV* Edition)

यद्धविः प्राप्नुवन्ति ᵛदेवाः। किंचाग्निः ᵛअहरहः प्रतिदिनमग्निहोत्रार्थं[६] ᵛजायते प्रादुर्भवति। तथा ᵛमासिमासि प्रतिमासं जायते पितृयज्ञार्थम्[७]। एतत्कालद्वयमुपलक्षणं पक्षचतुर्मासषण्माससंवत्सरादीनाम्। अपरे पुनरेवमाहुः। अहरहः[८] सूर्यात्मना जायते मासिमासि चन्द्रात्मनेति। ᵛअथ तमिममग्निं ᵛदेवा[९] ᵛदधिरे ᵛहव्यवाहं हविषां वोढारम्। एवमग्निः स्वात्मानं स्वयमेवोक्तवान् ॥

---

अयमग्निः ᵛअद्य ᵛनः अस्माकं ᵛदेववीतिं देवानामागमनवन्तं देवानां हविर्भक्षणोपेतं वा यज्ञं ᵛसाध्वीमकः साधुमकरोत्। वयं च ᵛयज्ञस्य ᵛगुह्यां गूढतरां ᵛजिह्वामविदाम लब्धवन्तः स्म।

ᵛआयुः देवैः दत्तमायुष्यं ᵛवसानः आच्छादयन् ᵛआगात् आगच्छति। आगत्य च ᵛनः अस्मदर्थं ᵛदेवहूतिं देवानामाह्वानवन्तं[१] यज्ञं ᵛभद्रामकः कल्याणं कृतवान् ᵛअद्य इदानीम् ॥

9

---

वेदभष्याध्ययनेन अवगम्यते

एषः सौचीकसूक्तः प्रसिद्धः सुन्दरः रहस्यार्थगर्भितश्च||

ऋ वे 10.51-10.55 पञ्चसूक्तेषु

अग्नेः भ्रातृणां उपाख्यानं, चन्द्रस्य केनचिदग्निना संयोगः, 3339 सङ्ख्याकैः कालज्ञानिभिः विश्वेदेवैः अग्नेः

आनयनं , तत्र अरुणवर्णक नीडरहितपक्षिणा प्रवेशं इत्यादयः कुतूहलं जनयन्त्येव |

अष्टाबन्धुरे रथे , सोमपानाय देवाः आगमिष्यन्ति ||

देवैः सोमपानं पौर्णमास्यां प्रारभ्यते इति शतपथे पठ्यते ||

**चन्द्रमा वै सोमो देवानामन्नं ता पौर्णमास्यां अभिषुण्वन्ति (श.ब्रा .11.1.5.3)**

आलंकारिकन् आर्षप्रयोगान् अपसृत्य सारांशमेव अधिदैवतरीत्या पश्यामश्चेत् इत्थं द्योतते ||

कस्मिंश्चित् पौर्णमास्यां चन्द्रः अरुणवर्णेन उपरक्तो अभवत् || 3339-विश्वेदेवैः आनीतः सौचिकाग्निः देवैः दत्तं

आयुष्यं (वसानः~आच्छादयन् ?) आगतः || एतद्यज्ञस्य रहस्यं ऋषयः जानन्ति स्म ||

10

रहस्यंतु 3339 संख्यायां अन्तर्हितम् इति अनुमीयते || एषा बृहत्संख्या कथं निष्कृष्टम् गणितम् वा ऊहितं ? वेदेषु न विशदं , परन्तु पुराणेषुविवरणं लभ्यते ||

<u>ब्रह्माण्ड पुराणं (पू.भा. अ.23)</u>

भक्षार्थममृतं सोमः पौर्णमास्यामुपासते
एकां रात्रिं सुरैः सर्वैः पितृभिः सर्षिभिः सह ६६
सोमस्य कृष्णपक्षादौ भास्कराभिमुखस्य तु
प्रक्षीयंते पितृदेवैः पीयमानाः कलाः क्रमात् ६७
त्रयश्च त्रिशतश्चैव त्रयस्त्रिंशत्तथैव च
त्रयश्च त्रिसहस्राश्च देवाः सोमं पिबंति वै ६८
इत्येतैः पीयमानस्य कृष्णा वर्द्धंति वै कलाः
क्षीयंति तस्माच्छुक्लाश्च कृष्णा आप्याययंति च ६९
एवं दिनक्रमात्पीते विबुधैस्तु निशाकरे
पीत्वार्द्धमासं गच्छंति चामावास्यां सरोत्तमाः ७०

33+303+3003

Vāyu-purāṇa 52.63, Ānandāśrama edition:

trayaś ca triśataṃ caiva trayastriṃśat tathaiva ca |
trayastriṃśat-sahasrāś ca devāḥ somaṃ pibanti vai ||

सोमः कृष्णपक्षे दिनक्रमादेव पीयते इत्युक्तम् | अर्थात् 3339 संख्यापि कृष्णपक्षदिनगणनमेव || अतः अविच्छिन्न कालगणने शुक्लपक्षदिवसानपि समेत्य द्विगुणं
3339 x 2 = 6678 भवति || यदि संवत्सरस्य दिनगणनं 360 इति गृह्यते चेत् 6678/360= 18.55 वर्षाः ;
यदि संवत्सरस्य 371 तिथयः चेत् , 6678/371= 18 वत्सराः इत्येव फलति ||
इदमेव अद्यापि राहुयुगम् राहुदशा इत्यपि प्रसिद्धम् || सौरमानेन 18 व. 11 दिवसेषु 223 पौर्णिमाः सन्ति आश्चर्यकरमिदं यत् अत्र 241 नक्षत्रमासापि विद्यन्ते ||
अतः यदा यस्मिन् मासे यस्मिन्नक्षत्रे चन्द्रः उपरज्यते 18 वर्षानन्तरं तस्मिन्नेवमासे तस्मिन् नक्षत्रसमीपे एव पुनः चन्द्रग्रहणं भविष्यति || अस्त्वेतत् , प्रश्नाः उत्पत्स्यन्ते | 3339-संख्या कथं संख्यातं, अनुस्मृतं चित्रितं लिखितं वा ? किं प्रमाणं ? अस्याः दर्शपूर्णमासेन च कः संबन्धः? अत्र तन्त्रं किञ्चिदस्ति वा?

11


दपू यागस्तु पञ्चदशवर्षं, त्रिंशत् वर्षपर्यन्तं अथवा जीवनपर्यन्तं विधीयते इति विज्ञायते || अतः यथा स्मृतिः प्रत्यक्षमैतिह्यं अनुमानः चतुष्टयम् इतिवत् चन्द्रस्य प्रतिदिन दर्शनं साध्यमेव तथा सति पौर्णिमासु प्राचीदिशि चन्द्रोदयं, पर्वसु ग्रहणदर्शनं स्वाभाविकं || पूर्णचन्द्रोदयं स्मर्यते चेत् अश्मना भूमौ चिह्नं क्रियते इति भावयामः || कालपर्यये तच्चिह्नानि अन्योन्यं आकलय्य समग्रमेकरूपं पुत्तलीव दृश्यते ||

अत्र द्वे चित्रे दर्शयामि || द्वेऽपि प्राक्प्रतीची पृष्ठ्यारेखापेक्षया दर्शिते || प्रथमं 18-वर्षीय पौर्णिमाचन्द्रोदयस्थानस्य अयनम् ||


द्वितीयं पौर्णिमानन्तरं कृष्णपक्षे दिने दिने विद्यमानचन्द्रस्थानानि | अस्मिन् चित्रे बिन्दवः 3339 एव सन्ति || रिक्तभागः शुक्लपक्षकाल एव || यथा सूर्यस्य संवत्सरे 365 दिनेषु द्वेअयनेभवतः तथैव चन्द्रस्य 27.33 दिनेष्वेव द्वे अयने स्तः|| एतत्कारणेन पौर्णिमाचन्द्रस्यापि तिर्यक् अयनम्भवति ||

इतःपरं पर्यालोचनया दार्शिकीवेद्याः चन्द्रमण्डलस्यच साम्यम् प्रत्यभिज्ञायते इति मे मतिः ||

223 FM points




3339 points




2006 इसवी-वर्षे (7-9-2006) भाद्रपदमासे चन्द्रग्रहणं पूर्वाभाद्रा नक्षत्रे दृष्टं ||
18वर्षानन्तरं भाद्रपौर्णिमायां पूर्वाभाद्रा नक्षत्रे (18-9-2024) ग्रहणं भविष्यति||

12

अन्यदपि प्रमाणं बौधायनशुल्बसूत्रे वेद्याः निर्माणे लभ्यते || तदपि किञ्चित् अवलोकयामः ||

||बौधायनशुल्बसूत्रम्||

७१. अपरेणाहवनीयं यजमानमात्री भवतीति दार्शपौर्णमासिकाया वेदेर्विज्ञायते| ७२. तस्यास्त्रिभागोनं पश्चात्तिरश्ची | तस्या एवार्धं पुरस्तात् तिरश्ची | एवं दीर्घचतुरस्रमेकतोऽणिमद्विहृत्य स्रक्तिषु शङ्कून्निहन्यात् | (१०) ७३. यावती पार्श्वमानी द्विरभ्यस्ता तावतीं रज्जुमुभयतः पाशां कृत्वा मध्ये लक्षणं करोति | दक्षिणयोः पार्श्वयोः पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणे शङ्कुं निहन्यात् | तस्मिन्पाशौ प्रतिमुच्य लक्षणेन दक्षिणं पार्श्वं परिलिखेत्| ७४. एतेनोत्तरं पार्श्वं व्याख्यातम् | ७५. पूर्वं पार्श्वं तया द्विरभ्यस्तया परिलिखेत् | एवमपरम् |




$\pi = 3.0885; \sqrt{3} = 26/15$

अत्रेदं चिन्तनीयम् || इष्ट्यां मुख्यत्वेन आहवनीय गार्हपत्य दक्षिणाग्नि चितयः व्यामप्रमाणेन समानक्षेत्रविस्तीर्णाः रूपेण भिन्नाः || वेद्याः क्षेत्रफलं नोक्तं तथापि दिष्ट्या भूमौ निवेशनविधिः यथातथं सूक्ष्मेक्षिकया सूत्रितं || अतः सूत्रकारेण उद्दिष्ट क्षेत्रमानं अस्माभिः रेखागणितरीत्या ज्ञातुं शक्यते ||

चतुर्भुजाकार ABCD क्षेत्रं = 5376 अङ्गुलानि
तत्र अपाकरणक्षेत्रफलं 2032-2041 (अङ्गुलानि)
अतः उद्दिष्ट वेदि क्षेत्रं= 3334-3345 अङ्गुलानि
नेदीयेन 3339 भवति ||

इदं काकतालीयमिति वक्तुं शक्यते किं?



*वेदकाले ग्रहणशोधनार्थं वेदीं उपयुक्तवन्तः इति शङ्कितुम् साध्यम् ||*

पु॒राक्रू॒रस्यं वि॒सृपोंविरप्शिन्नु॒दा॒दायं॑पृथि॒वीं जी॒रदां॑नु॒र्यामैरं॑यञ्च॒न्द्रमं॑सि स्व॒धाभि॒स्तांधीरां॑सो अनु॒दृश्यं॑यजन्ते॥

(तै. संहिता १. १. ९ )

*सायणभाष्ये*

पूर्वे यजमाना वेदिरूपं यां पृथिवीं कृत्स्नभूमेरासुर्याः सकाशादूर्ध्वमादाय चन्द्रमस्यमृतकिरणैः सार्धं स्थापितवन्तः इदानीन्तनास्तु धीमन्तः तामिमां वेदिं मनसानुचिन्त्य तस्यां यजन्ते॥

*भट्टभास्करभाष्ये*

यद्वा—हे विरप्शिन् वेदे, क्रूरस्याररुनाम्नोऽसुरस्य विसर्पणात्प्रागेव यां त्वामुदादाय चन्द्रमसि स्थिताभिस्स्वधाभिः अमृतैर्हेतुभिः जीरदानुभूतां* पृथिवीमैरयन् प्रापयन्, तां तथाविधां त्वां अनुदृश्य धीरा यजन्ते । तस्माद्वयमपि तादृशीं त्वामवगम्य यजामः इति । दासीभारादित्वाच्चन्द्रमसीति पदे पूर्वपदप्रकृतिस्वरत्वम् '। 'यदेवास्या अमेध्यम् '[1] इत्यादि ब्राह्मणम् ॥

अन्ये विशेषाः बहवः सन्ति|

मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा॥ *TS* (I. 1.11.12)

ब्रह्मणः यजमानं प्रति उपांशुअनुज्ञायां पठ्यते||

...नाकस्य पृष्ठे यजमानो अस्तु| सप्तऋषीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि ||

अद्य अलमति विस्तरेण॥
अधिदैवतपक्षदृष्ट्या पुरातन वैज्ञानिक तत्त्वानां संशोधनं वैदिकग्रन्थानां विश्लेषणं व्याख्यानं वर्तमानकाले
भारतीयेतिहसदृष्ट्या वैदिकबौद्धिकविद्यास्थिरीकरणाय च अत्यवश्यं करणीयम् इति
संगोष्ठी संयोजकान् समुपस्थितविद्वज्जनान्
प्रार्थयन् नमस्कुर्वन् विरमामि॥

**धन्योस्मि**

15

